IJAER/ November-December 2025/Volume-14/Issue-6 ISSN: 2278-9677
International Journal of Arts & Education Research
(Peer-Reviewed, Open Access, Fully Refereed International Journal) Impact Factor:7.06

# शतककाव्यपरम्परायां श्रीराधापञ्चशतीकाव्यस्य अवदानम्

**Kumarjit Das[1], Dr. Renu Singh[2]**

*[1,2] Department of Sanskrit, Mansarovar Global University, Sehore, MP, India*

## ❖ उपोद्घातः—

संस्कृतसाहित्यभाण्डागारे अनेके रत्नस्वरूपाः कवयः अजायन्त। तेषु विंशशतकीयाः प्रो० रसिकविहारीजोशिवर्याः अन्यतमाः सन्ति। बाल्यकालादेव जोशिमहोदयः संस्कृतकाव्यानुरागी आसीत्। अत एव बाल्यकालाद् एव महोदयः संस्कृतश्लोकानां रचनां, समस्यापूर्तिं, संस्कृतशास्त्रार्थम् इत्यादिविषयान् आचरति स्म। छात्रजीवने सहपाठिभिः सह शास्त्रार्थे महोदयः प्रथमस्थानं प्राप्य पदकं प्राप्तवान्। किञ्च महोदयः अतीवनिपुणतया संस्कृतसम्भाषणं करोति स्म। तस्मात् कारणादेव अप्रतिहतसंस्कृतभाषी इत्युपाधिना अपि महोदयः विभूषितः। ततश्च पण्डितनारायणशास्त्रिमहोदयः अपि जोशिमहोदयस्य एतादृशीं प्रतिभां दृष्ट्वा "अभिनवबाणभट्टः" इत्युपाधिना महोदयं सम्मानितवान्[1]। जोशिमहोदयस्य तावत् कवयित्री भावयित्री इति प्रतिभाद्वयम् अपि आसीत्। तथाहि महोदयः करुणाकटाक्षलहरी इत्याख्यं संस्कृतगीतिकाव्यं रययामास। यच्च सप्तसप्तत्यधिकोनविंशशततमे वर्षे प्रकाशितः अभवत्। एतत् गीतिकाव्यम् अतीवप्रसिद्धम् अस्ति। अत्र कविकल्पना, वाक्यविन्यासः, काव्यस्य चारुता इत्येते विषयाः स्फुटं वर्तन्ते। अतः मध्यप्रदेशसाहित्य-अकादेमी किञ्च उत्तरप्रदेशसंस्कृतसाहित्य-अकादमी इत्येभ्यां संस्थाभ्यां एतत् गीतिकाव्यं पुरस्कृतम् अभवत्[2]। ततश्च सरस्वतीदेव्याः स्तुतिपरकं सारस्वतम् इत्याख्यं गीतिकाव्यम् अपि

[1] प्रोफेसर रसिक विहारी जीशी कृत श्रीराधापञ्शती काव्यं का समीक्षात्मक अध्ययन, इलाहावादविश्वविद्यालयः, अध्याय-१, पुटम्-०६।

[2] तत्रैव।

Copyright@ijaer.org

महोदयस्य अतीवप्रसिद्धम्। यस्मिन् तावत् आगमपुराणादीनां सम्यक् वर्णनं जोशिमहोदयस्य आगमे पुराणे च गहनाध्ययनं परिचाययति[3]। अष्टसप्तत्यधिकोनविंशशततमे वर्षे प्रकाशितं महोभंगम् इत्याख्यं महाकाव्यं महोदयस्य महाकवित्वस्य परिचायकः भवति। तथाहि अस्मिन् महाकाव्ये अष्टौ सर्गाः वर्तन्ते। इयमपि कृतिः जोधपुरविश्वविद्यालयेन, उत्तरप्रदेश-अकादेम्या च पुरस्कृता वर्तते[4]। एतदतिरिच्यापि जोशिमहोदयस्य प्रज्ञापारिजातम् इति काव्यम् अपि वर्तते। इदं काव्यम् आर्याछन्दप्रधानं विद्यते। तत्र

वेदव्याकरणमीमांसान्यासवैशेषिकवेदान्तकाव्यशास्त्रसमाजस्थस्य दृष्टान्ताः आलोचिताः वर्तन्ते। षडशीत्यधिकनवदशशततमे वर्षे इदं काव्यं आङ्ग्लोभाषायाम् अनुदितम् अभवत्। द्वितीयं संस्करणं च फ्रेञ्चभाषायाम् अनुदितम् अभवत्। तस्मिन्नेव वर्षे श्रीगोवर्धनगौरवम् इति संस्कृतकाव्यं हिन्दीभाषायाम् अनूद्य प्रकाशितः। ततश्च त्रिनवत्यधिकोनविंशशततमे वर्षे श्रीराधपञ्चशती इत्याख्यं काव्यं प्रकाशितम्। इदं काव्यं तावत् राजस्थानस्य प्रो० रामप्रतापशास्त्रीट्रस्टव्योवरतः प्रकाशितः अभवत्। अस्मिन् तावत् पञ्चशतम् उत्कृष्ठसंस्कृतश्लोकाः समाविष्टाः सन्ति। अस्मिन् गीतिकाव्ये राधां प्रति भक्तिं ध्यानं च द्रष्टुं शक्यते। काव्येऽस्मिन् भाषायाः सरलता, माधुर्यं, संगीतात्मकता इत्येतैः दार्शनिकतत्त्वस्य लीलाप्रसङ्गस्य भक्तिभावस्य च सम्यक् स्फुटीभावं द्रुष्टं शक्नुमः। तथाहि इदं वक्तुं शक्यते यद् इदं गीतिकाव्यं संस्कृतसाहित्ये भक्तिकाव्यधारायाम् एकम् अतीवमहत्त्वपूर्णं स्थानं भजते। अस्य काव्यस्य सौन्दर्यम् एवं रीत्या विचारयितुं शक्यते यत् एतस्य काव्यस्य उत्कर्षताम् आदाय एव द्विसहस्रतमे संवत्सरे के० के० विडला फाउन्डेशन् इति संस्था रसिकविहारीजोशिमहोदयाय अष्टमवाचस्पतिपुरष्कारेण विभूषितवती[5]। एतदतिरिच्यापि

[3] तत्रैव।

[4] मोहभंगम् महाकाव्य एक परिशीलन इति लघुशोधप्रबन्धे लेखिका कु० बेला हाण्डा इत्यत्र उद्धृतम्, पृष्टम्-८।

[5] प्रोफेसर रसिक विहारी जीशी कृत श्रीराधापञ्शती काव्यं का समीक्षात्मक अध्ययन, इलाहावादविश्वविद्यालयः, अध्याय-१, पुटम्-७।

महोदयेन श्रीभक्तिमीमांसा, श्रीशिवलिंगरहस्यम्, श्री उपदेशबल्ली, श्रीस्पर्शास्पर्शविवेकः इत्येते ग्रन्थाः विरचिताः। न केवलम् एतान् ग्रन्थान् महोदयः रचयामास अपि तु एतेषां ग्रन्थानां हिन्द्यनुवादम् आङ्ग्लानुवादम् अपि कृतवान्। यश्च अनुवादः सप्तनवत्यधिकनवदशशततमे संवत्सरे प्रकाशितः अभवत्। एतान् ग्रन्थान् अतिरिच्य अपि श्रीसौदर्शनम्, श्रीगुरुपंचाशिका, श्रीगिरिराजपंचाशिका, श्रीरामप्रतापचरितम्, सुवर्णमाला इत्येते ग्रन्थाः प्रकाशिताः सन्ति। एतेषु श्रीरामप्रतापचरितम् अष्टनवत्यधिकोनविंशशततमे वर्षे हिन्दीभाषायाम् आङ्ग्लोभाषायां च प्रकाशितः। इदं तावत् महाकाव्यं वर्तते। ततः अग्रिमे वर्षे आङ्ग्लानुवादसहितं सुवर्णमाला पुस्तकं चतुर्षु भागेषु प्रकाशितम्। पुनश्च रसिकविहारीमहोदयेन स्पेनिश्-भाषायां योगसूत्रस्य काचित् टीका अपि रचिता वर्तते। एतेन विदुषा अनेकानि अमूल्यानि ग्रन्थरत्नानि विरचितानि। तेषु राधापञ्चशतीमहाकाव्यम् अन्यतमम्। अस्य काव्यस्य स्वरूपं किञ्चिद्विस्तरेण वर्ण्यते।

### ❖ मुक्तककाव्यम्—

मम शोधे अस्मिन् प्रतिपाद्यमानस्य काव्यस्य वैशिष्ट्यम् इदम् अस्ति यद् इदमेकं पञ्चशतीकाव्यम् अस्ति। यस्मिन् तावत् पञ्चशतश्लोकानां समावेशः वर्तते। ते च श्लोकाः पूर्णतया मुक्तकाः सन्ति। अर्थात् निरपेक्षम् अस्ति। अतः राधापञ्चशतीकाव्यस्य आलोचनायाः पूर्वं तावत् मुक्तककाव्यानां विषये किञ्चित् आलोच्यते विस्तरेण। पूर्वापरप्रसङ्गरहितं परस्परनिरपेक्षकाव्यं मुक्तककाव्यं भवति। मुच्लृ मोक्षणे इति धातोः क्तप्रत्यये मुक्तः इति रूपं निष्पद्यते। तत्र मुक्त इति शब्दात् कन्-प्रत्यये सति मुक्तक इति रूपं निष्पद्यते। मुक्तककाव्येषु पूर्वापरप्रसङ्गस्य प्रयोजनं न भवति। नाम मुक्तककाव्यं स्वतन्त्रं भवति। अतः एतेषां कृते अनिबद्धम् इत्यपि नामान्तरं वर्तते। अभिनवगुप्तेन मुक्तकविषये उक्तम्—"मुक्तम् अन्येन नालिङ्गितम्"[6]। तस्य संज्ञायां कन्। एवञ्च मुक्तकस्य अर्थः आगच्छति पूर्वापरनिरपेक्षेणापि

[6]ध्वन्यालोकः (श्रीमदाचार्याभिनवगुप्तविरचितया व्याख्ययानुगतः), काशिनाथशर्मा (संशोधकः), निर्णयसागराख्ययन्त्रालयः, पुटम्-१४१।

हि येन रसचर्वणा क्रियते तदेव मुक्तकम् इति[7]। भामहः मुक्तककाव्यस्य विषये वदति अनिबद्धं काव्यं मुक्तकम् इति। एवमेव वामनः दण्डी इत्येतैः आचार्यैः मुक्तकविषये मनाक् स्पृष्टम्। यद् वा भवतु परन्तु मुक्तकपदेन परस्परनिरपेक्षपद्यसमूहस्यैव ग्रहणं भवति। पुराणेषु अपि मुक्तककाव्यस्य परिभाषा लभ्यते। तथाहि भारतीयज्ञानकोषः इत्यभिधया भूषिते अग्निपुराणे अपि मुक्तकस्य संज्ञा प्रदत्ता। यत् काव्यम् एकाकी स्थित्वा चमत्कारं जनयितुं समर्थं भवति तत् काव्यं मुक्तकम् इत्युक्तम्। तथाहि तत्र लिखितम्—"मुक्तक श्लोक एवैकश्चमत्कारक्षम सताम्" इति[8]। दृश्यकाव्यानां महाकाव्यादिश्रव्यकाव्यानां च श्रवणेन यथा सहृदयानां रसोद्रेकः भवति। तथैव मुक्तककाव्यतः अपि रसोद्रेकः भवति। परन्तु महाकाव्येषु कदाचित् एकः श्लोकः रसजनकः न भवति अपि तु अनेकेषां श्लोकानां समाहारः रसजनकः भवति। किन्तु मुक्तककाव्येषु तथा नास्ति। मुक्तककाव्ये तु एकैकः श्लोकः एव रसोत्पादने समर्थः भवति। तत्र प्रत्येकं पद्यं स्वतः पूर्णं भवति।

इदानीं मुक्तककाव्यस्य भेदानां विषये किञ्चित् चर्च्यते। तथाहि मुक्तककाव्यस्य चत्वारः भेदाः भवन्ति इति दण्डिनः मतम्। तथाहि मुक्तकं, कुलकं, कोशः संघातश्च। अग्निपुराणे कलाप-पर्यायबन्ध-विशेषक-कुलक-मुक्तक इतिभेदेन मुक्तककाव्यस्य भेदाः परिगणिताः। ध्वन्यालोकेऽपि मुक्तककाव्यस्य षट्भेदाः वर्णिताः सन्ति। तथाहि मुक्तकं, सन्दानितकम्, विशेषकं, कलापकं, कुलकं, पर्यायबन्धश्च। आचार्येण राजशेखरेण तावत् मुक्तकसंग्रहे मुक्तकस्य पञ्चभेदाः प्रतिपादिताः। ते यथा शुद्धमुक्तकः, चित्रमुक्तकः, कथोत्थमुक्तकः, संविधानकभूःमुक्तकः, आख्यानवान् मुक्तकश्च। एवं च विविधैः आचार्यैः मुक्तकस्य भेदाः परिगणिताः। परन्तु एते भेदाः लोके तावत् व्यवहारे न श्रूयन्ते अपि तु एते भेदाः मुक्तककाव्यानां संख्यापरकभेदाः अथवा संख्यापरकनामकरणमेव अद्यतनीयपरम्परायां दृश्यते। तथाहि कविः

[7] भामहकृतः काव्यालंकारः, देवेन्द्रनाथशर्मा(भाष्यकारः), विहारराष्ट्रभाषातपरिषद्,पुटम्-१६।

[8] अग्निपुराणे ३३७/३६ तमे श्लोके

यदा काव्यं करोति तदा कमपि एकं विषयम् आदाय स्वेच्छया तेन यानि पद्यानि स्वप्रतिभया प्रकटितानि तानि काव्यपदवाच्यानि भवन्ति। परन्तु तस्मिन् काले कवि पद्यानां गणनां न करोति अपि तु केवलं काव्यमेव करोति। अन्ते यदा तेषां गणना अथवा विषयः कः इत्येतेतत् सर्वम् आलंकारिकाः विचारयन्ति तदा एव काव्यानाम् एतादृशभेदाः उत्पद्यन्ते। तथाहि कदाचित् पञ्च पद्यात्मकं मुक्तकं भवति, कदाचित् अष्टपद्यात्मकं मुक्तकं भवति, कदाचित् पञ्चदशपद्यात्मकं मुक्तकं भवति, कदाचित् पञ्चाशत्पद्यात्मकं, शतपद्यात्मकं, पञ्चशतपद्यात्मकं, सप्तशतपद्यात्मकं वा मुक्तकं जायते। अतः एतेषां मुक्तकां तत्तत्संख्यानुसारमेव एतेषां तादृशं नाम भवति। तथाहि यदि पञ्च पद्यानि विद्यन्ते तर्हि तस्य नाम भवति पंचकं, यदि सप्त पद्यानि सन्ति तर्हि तस्य सप्तकम् इति नाम भवति, एवमेव अष्टकं, नवकं, दशकं, पञ्चदशी, पञ्चाशिका, शतकम्, पञ्चशती, सप्तशती इत्येतानि नामानि जायन्ते। एतेषु मुक्तकभेदेषु पंचकसंज्ञकं मुक्तकं यथा वैराग्यपञ्चकं, शंकराचार्यकृतं ललितापञ्चकम् इत्येतानि अन्यतमानि। सप्तकसंज्ञककाव्येषु श्रीपादसप्तकं, मुद्रासप्तकम् इत्येतानि अन्यतमानि, अष्टकसंज्ञककाव्येषु मयूरकविविरचितं मयूराष्टकं, कृष्णकविरचितं राधाष्टकं, भगवान् शङ्कराचार्यविरचितं शिवाष्टकं, गंगाष्टकं, अम्बाष्टकं, यमुनाष्टकं, कृष्णाष्टकम् इत्येतानि अतीवप्रसिद्धानि सन्ति। नवसंख्यकमुक्तकेषु हरिनवकम् इति अन्यतमम्। दशकसंज्ञककाव्येषु नरसिंहाचार्यकृतं वेदान्तदशकं, श्रीशंकराचार्यकृतम् अन्नपूर्णादशकम् अन्यतमम्। पञ्चदशीकाव्येषु विप्रपञ्चदशी इत्याख्यं काव्यम् अन्यतमं, पञ्चाशत्पद्यात्मिका या पञ्चाशिकाकाव्यं वर्तते तत्र चौरपञ्चाशिका, अप्पय्यदीक्षितकृता शिवपञ्चाशिका अन्यतमा।

❖ **शतककाव्यानां परम्परा–**

पूर्वोक्तेषु सर्वेषु काव्येषु शताद् न्यूनाः श्लोकाः विद्यन्ते। परन्तु अस्माकं कवयः अधिकाधिकतया तानि मुक्तककाव्यानि रचितवन्तः येषु तावत् शतम् अथवा त्रिशतम् अथवा पञ्चशतं, सप्तशतं

वा श्लोकाः विद्यन्ते। तादृशानां काव्यानां बाहुल्यत्वात् अत्र शतककाव्यानां विषये किञ्चित् विस्तरेण आलोच्यते। मुक्तककाव्येषु सर्वेषामपि रसानाम् उपयोगः भवति परन्तु तत्र अधिकतया शृङ्गाररसस्यैव प्राधान्यं दृश्यते। शृङ्गाररसः मनुष्याणां स्वाभाविकी स्थितिः भवति अतः सहृदयाः कवयः वा शृङ्गारमेव अधिकतया आश्रयन्ति। मुक्तकेऽपि तस्य अन्यथा न जाता। अत एव अस्माकं समीपे भर्तृहरिकृतं शृङ्गारशतकं, अमरुकविकृतम् अमरुशतकम् इति शृङ्गाररसपरकाणि काव्यानि विद्यन्ते। षष्ठशताब्द्यां सप्तमशताब्द्यां च अधिकतया शतककाव्यस्य परम्परा आरब्धा, या च परम्परा अद्यावधि चलति। पुनः यां च धाराम् अनुसृत्य रसिकविहारीमहोदयेन राधापञ्चशत्याख्यं सुमधुरं काव्यं सम्पादितम्। एतस्मात् कारणादेव विंशशताब्द्यामपि एतादृशी परम्परा अक्षुण्णा वर्तते। शतम् इति शब्दः अस्माकं संस्कृतौ एकं विशिष्टं स्थानं भजते। अत एव शतककाव्यकरणे कवीनां महान् उत्साहः परिलक्ष्यते। दृश्यते च चण्डीशतकम्, अच्युतशतकं, सूर्यशतकम् इत्यादीनि स्तुतिपरकाणि शतककाव्यानि। अत्र शतककाव्यानां विषये अयमपि विशेषः वर्तते यत् शतककाव्येषु प्रायः शृङ्गाररसस्य प्राधान्यं भवति इति मया पूर्वमेव उक्तम्। शृङ्गाररसस्य विभावानुभावव्यभिचारीभावादीनां उत्पत्तौ नरीणां महती भूमिका भवति अतः कविः कदाचित् नार्याः किञ्चिद् अङ्गमादाय एव शतककाव्यं कर्तुम् उद्यतो भवति। तथाहि दृश्यन्ते रोमावली-शतकम् इत्यादीनि काव्यानि। एतदतिरिच्य अपि समाजस्य कामपि अवस्थामादाय शतकं भवति। इष्टदेवस्य नामानुसारमपि शतककाव्यं भवति। यद्वा भवतु शतककाव्येषु तावत् एकशतश्लोकात्मकं शतककाव्यं, त्रिशतश्लोकात्मकं त्रिशतीकाव्यं, पञ्चशतश्लोकात्मकं पञ्चशतीकाव्यं, सप्तशतश्लोकात्मकं सप्तशतीकाव्यम् अन्यतमं भवति इति पूर्वमेव उक्तम्। तत्र त्रिशतीकाव्येषु श्रीकण्ठत्रिशती किञ्च आर्यात्रिशती इति काव्यद्वयं प्रसिद्धम्। पञ्चशतीसंज्ञकेषु मूकपञ्चशती किञ्च राधापञ्चशती इति काव्यद्वयं प्रसिद्धम्। सप्तशतीसंज्ञकेषु तावत् दुर्गासप्तशती किञ्च महाकविहालविचरितं

गाथासप्तशती प्रसिद्धे स्तः। एतत्काव्यद्वयम् अतिरिच्य अपि भक्तिसप्तशती, मुक्तिसप्तशती इत्येतानि काव्यानि अपि सप्तशतीकाव्येषु अन्यतमानि।

❖ **शतककाव्येषु राधापञ्चशतीकाव्यम्—**

इतः पूर्वं शतककाव्यानां विषये विस्तरेण चर्चा प्रसृता। तत्र शतककाव्यानाम् अपि भेदाः उक्ताः। तेषु एकः भेदः अस्ति पञ्चशतीकाव्यम्। यस्मिन् तावत् पञ्चशतं श्लोकान् आदाय काव्यं क्रियते। वयम् इतः पूर्वं दृष्टवन्तः यद् उपलभ्यमानानि शतककाव्यानि प्रायशः त्रिविधानि भवन्ति। तेषु क्वचित् केवलं शृङ्गारस्य वर्णनं क्रियते, क्वचित् केवलं नीतिपरकम् अथवा समाजोपयोगि भवति, तृतीयञ्च देवस्तुतिपरकं भवति। यत्र तावत् अभीष्टदेवस्य आराधनं क्रियते। अत्र राधापञ्चशतीकाव्यं देवस्तुतिपरकम् अस्ति। नाम अत्र वैष्णवप्रभावेण प्रभावितः कविः रसिकविहारीजोशी महोदयः श्रीराधायाः वर्णनं स्तुतिं च करोति अस्मिन् काव्ये। राधापञ्चशतीकाव्यस्य विषयस्तावत् श्रीकृष्णराधयोः चरितमादाय प्रवर्तते। वैष्णवशास्त्रे अद्वैतज्ञानस्वरूपं वर्तते भगवान् श्रीकृष्णः। तत्र श्रीकृष्णे त्रयाणां अभिन्नशक्तीनां स्थितत्त्वादेव सः साधकानां चिदाकाशे भासते। तथाहि श्रीकृष्णे स्थिताः ताः शक्तयः सन्ति—सान्धिनी, संवित्, ह्लादिनी च। एतासु तिसृषु शक्तिषु सान्धिनीशक्तिः भगवतः श्रीकृष्णस्य नित्यसत्ताधारणे सहायिका भवति। घटे यथा घटत्वं नित्यरूपेण तिष्ठति तथैव श्रीकृष्णे एषा सान्धिनीशक्तिः अपि नित्यरूपेण तिष्ठति। वैष्णवसम्प्रदाये उच्यते सान्धिनीशक्तिः भगवतः कृष्णस्य सा अपरूपा शक्ति अस्ति या सत्-तत्त्वस्य आधारेण सम्पूर्णस्य आध्यात्मिकास्तितत्वस्य स्थितिं धारयति। एषा शक्तिः भगवतः स्वकीयधाम्नः, भगवतः दिव्यरूपस्य, आध्यात्मिकवस्तूनां च वास्तविकम् अस्तित्वं धारयति। यथा भगवतः दिव्यं धाम भवति गोकुलधाम, भगवतः दिव्यविग्रहः इत्येतत् सर्वं सान्धिनीशक्त्या प्रतिष्ठिता भवति। एवमेव भगवतः या शक्तिः ज्ञानं प्रकाशयति, भगवतः स्वरूपं प्रकाशयति, भगवतः महिमानं च तत्त्वतः बोधयति सा शक्तिः संवित्-शक्तिः भवति। अर्थात् एषा शक्तिः भगवतः स्वरूपज्ञानस्य तत्त्वबोधस्य प्रकाशे च

सहायिका भवति। अनया शक्त्या तावत् भगवतः तत्त्वज्ञानस्य, भगवतः महिम्नः बोधः, भक्तानां हृदये भगवतः बुद्धेः प्रकाशः भवति। पुनश्च ह्लादिनीशक्तिः सा अस्ति यया भगवान् श्रीकृष्णः आनन्दानुभवम् आह्लादानुभवं च करोति किञ्च एषा शक्तिः एव भक्तानां हृदये भगवद्भक्तिरूपेण दिव्यानन्दं जनयितुं सहायिका भवति। अस्याः शक्त्याः प्रभावेण भक्तानां हृदये भगवद्भक्तिः उत्पद्यते, भक्तानां हृदये भगवद्विषयकं प्रेम उत्पद्यते, भगवतः दिव्यानन्दस्य च अनुभूतिः भवति। भगवति श्रीकृष्णे एषा ह्लादिनीशक्तिः भवति राधा। तत्र राधा शक्तिः वर्तते श्रीकृष्णश्च शक्तिमान् अस्ति। अनयोः अभेदः वर्तते। तथाहि यथा शब्दार्थयोः अभेदः तादात्म्यं वा भवति, यथा अग्नौ दाहकत्वशक्तिः स्वतः भवति, दाकहत्वशक्तिः अग्नितः पृथक्कर्तुं न शक्यते एवमेव भगवतोः श्रीकृष्णराधयोः अभेदः वर्तते, तत् पृथक् कर्तुं न शक्यते। लोकव्यवहारे यद्यपि तयोः भिन्नं वपुः दृश्यते परन्तु अन्ततः तौ एक एव तयोः नास्ति कोऽपि भेदः। श्रीराधापञ्चशतीकाव्ये एषः विषयः अपि प्रतिपादितः वर्तते तिलेषु यथा तैलं व्यापृत्य तिष्ठति तथैव भगवति श्रीकृष्णे राधारूपा आह्लादिनी शक्तिः अपि सम्पूर्णं व्याप्य तिष्ठति। यदा एवं स्थितिः भवति तदा भगवतः आनन्दः जायते, आनन्दे सति एव भगवान् लीलां करोति। ये भेदाभेदरहिताः सन्ति ते एव एतस्याः लीलायाः आनन्दं प्राप्तुं शक्नुवन्ति। ते एव भगवतः स्वरूपस्य अवलोकनं कर्तुं समर्थाः भवन्ति। तत्र भगवत्याः राधायाः उपासनं यः कोऽपि कर्तुं समर्थो न भवति। तत्रापि विद्यते काचित् योग्यता। तथाहि—

प्रथमं तावत् राधाकृष्णयोः स्वरूपयोः यथार्थं ज्ञानम् आदावपेक्षते। इदं ज्ञानं गुर्वोक्तमार्गेण एव प्राप्तुं शक्यते। किञ्च अत्र गुरुः तादृशः भवति यः राधाकृष्णयोः भक्तः स्यात्।

द्वितीयं तावत् सद्गुरुः राधाकृष्णयोः स्वरूपं विधिवद्वर्णयति चेत् तदापि कश्चित् उपासनायाः अधिकारी भवितुं नार्हति। सः तदा एव अधिकारी पदवाच्यः भवति यदा तेन कामक्रोधादीनां रिपूणां जयः कृतः।

ततः अग्रे कामक्रोधादिरिपून् जेतुम् जिज्ञासोः मनः निर्मलं बुद्धिः स्वच्छा भवेत्। एवं भवति चेदेव तत्र विषयाः सम्यक् प्रकाशन्ते। तादृशं मनः तादृशी बुद्धिः च कामादीनां जये सहायिका भवितुम् अर्हति। किञ्च एतादृशस्य मनसः एतादृश्याः बुद्धेश्च प्राप्त्यर्थम् अवश्यमेव सद्गुरोः कृपा अपेक्षिता भवति।

एवं प्रकारेण गुरोः कृपया यदा रिपूणां जयः क्रियते किञ्च अन्तर्देहस्य शुद्धिः भवति तदा तस्य मनः स्फटिकः इव शुद्धः भवति। सः स्वयम् अनुभवति यत् तस्य सुषुम्नायां अलौकिकं तडित्प्रवाहम् अनुभवति।

ततः अग्रे साधकस्य वैराग्यम् उत्पद्यते। संसारे स्थितानां विषयाणां प्रति तस्य जिज्ञासा लिप्सा वा न भवति। तदा सः पुत्रपत्नीमित्रादिबन्धुभ्यः एकाकी तिष्ठति। सः इदम् अनुभवति यत् अयं संसारः साररहितः अस्ति। इदं जगत् केवलं प्रपञ्चमात्रम् एव वर्तते इति। इयम् अवस्था परवैराग्यम् इत्युच्यते।

ततः अग्रे उपासकः बहिर्विश्वात् विमुखः सन् अन्तर्जगति एव राजते। अन्तर्जगति सर्वदा सः भावसमाधौ एव तिष्ठति। अस्याम् अवस्थायां साधकस्य यत् स्थूलशरीरं वर्तते तत् शरीरं जगतः सर्वाणि कार्याणि करोति परन्तु तत्फलेन न लिप्यते। अस्याम् अवस्थायाम् उपासकः राधायाः उपासनायां लीनः भवति। एवम् उपासनाकाले साधकस्य अन्तर्देहस्य रचना भवति यः सिद्धदेहः इत्यपि उच्यते। किञ्च साधकः स्थूलसाधकदेहस्य सूक्ष्मसिद्धाख्यस्य अन्तर्देहस्य सहयोगेन अहर्निशम् आराधनायां लीनः भवति। एवं सिद्धौ उपासके भगवत्याः राधायाः कृपादृष्टिः वर्षति। तदा सः साधकः आनन्देन राधाकृष्णयोः नूतनानां लीलानां साक्षी भवति।

रसिकविहारीजोशिमहोदयेन राधापञ्चशतीमहाकाव्ये अत्युत्तमरीत्या श्रीराधायाः ध्यानस्य विधिः वर्णितः वर्तते। तत्र राधायाः ध्यानस्य विधिद्वयं वर्तते। तयोः प्रथमः अस्ति स्वरूपध्यानविधिः। स्वरूपध्यानकाले यदा भेदः विकल्पः च नष्टः भवति तदा चित्तं केवलं

राधायाः स्वरूपे एव अवस्थानं करोति। राधायाः चिन्तने तन्मयः भवति। एवं स्थितौ राधायाः स्वरूपं दर्शनं सकृद् भवति। अत्र काचित् प्रक्रिया वर्तते। आदौ तत्र रत्नपीठस्य ध्यानं कर्तव्यं भवति। यदा रत्नपीठं सम्यक् प्रकाशते तदा नीलकमलं प्रकटितं भवति। अस्य नीलकमलस्य द्वादश दलानि भवन्ति किन्तु ध्यानावस्थायाम् अष्टदलानि एव प्रकाशितानि भवन्ति। किञ्च तस्मिन् नीलकमले नीलवर्णयुतवस्त्रेण परिवृता राधा प्रकाशते। तत्र वर्णितम् अस्ति यत् राधायाः तनोः कान्तिः लक्ष्याधिकविद्युदालोकेव चकास्ते। राधायाः आभूषणानां विषये अपि तत्र वर्णनम् अस्ति। तथाहि तस्मिन् प्रकाशे राधायाः कर्णस्थम् आभूषणं विद्युतः प्रभा इव प्रकाशते। राधायाः अयं विग्रहः साधकस्य पुरतः एकपलपरिमितं कालम् अपि न तिष्ठति। सः विग्रहः अंगुष्ठमात्रेण भास्वद्गौरवर्णयुतेन प्रकाशेन विपरिणमते। एतादृशस्य विग्रहस्य यदा साक्षात्कारः भवति तस्मिन्नेव क्षणे साधकः समाधौ लीनः भवति। एवञ्च भगवत्याः राधायाः कृपया साधकः दिव्यचक्षुयुक्तः भवति। साधकः यदा दिव्यचक्षुः प्राप्नोति तदा सः त्रिकालज्ञो जायते किञ्च अनया ज्ञानशक्त्या युक्तः साधकः दीर्घकालं यावत् समाधौ रमते। समाध्यवस्थायां साधकस्य शरीरविषये चिन्तनमेव न भवति सः केवलं श्रीकृष्णराधयोः लीलाः च अनुभवन् मोदते। एतावता ध्यानस्य स्वरूपविधिविषये वर्णितम्। इदानीं ध्यानस्य द्वितीयाङ्गस्य विषये उच्यते। ध्यानविधेः द्वितीये अङ्गे साधकः चित्तवृत्तिं साध्यमन्त्रस्य ज्योतिर्मयबिम्बे केन्द्रितं करोति। ज्योतिर्मयबिम्बः प्रकाशितो भूत्वा श्वेतविन्दुत्रयरूपेण प्रकटितो भवति। ततः सः बिन्दुः ऊर्ध्वमुखयुतं त्रिकोणरूपं धरति। अस्मिन् त्रिकोणे रेखा न तिष्ठति, केवलं कोणत्रयमेव दृश्यते। यदा साधकस्य साधना गभीरतां प्राप्नोति तदा एतत् विन्दुत्रयं क्रमशः लुप्यते किञ्च अन्ततः कमले एकः कृष्णवर्णीयः बिन्दुः दृश्यते। अस्य तात्पर्यम् अस्ति यत् अनेन प्रकारेण साधकस्य चित्तवृत्तयः क्रमशः एकीभूताः भवन्ति। पञ्चसु चित्तवृत्तिषु अन्तिमायां चित्तवृत्त्यां साधकः सम्यग्रीत्या मनः स्थापयति। अत्र उच्यते यत् साधकः ध्यानस्य एतं विधिं केवलं गुरुकृपया एव प्राप्तुम् अर्हति। पूर्वोक्तयोः द्वयोः विध्योः एकः अपि सरलः नास्ति। कोऽपि

भाग्यवान् साधकः एव लक्ष्यं प्राप्तुं समर्थो भवति। अत्र तु इदं वक्तव्यं यत् साधनायाः एतादृशफलप्राप्तिः तदा एव सम्भवति यदा साधकस्य अस्मिन् लोके जायमानानां कर्मणां फलेषु आकाङ्क्षा न भवति किञ्च परलोके फलभोगेच्छा अपि न भवति। अस्माकम् आत्मा चित्तेन इहलोके परलोके च भोगान् भुञ्जते किन्तु यः उदासीनः उभयलोके स्थितं सुखं वा दुःखं वा भोक्तुं विरक्तः भवति स एव वस्तुतः साधनायाः फलप्राप्तौ क्षमः भवति। अस्मिन् कर्मणि सद्गुरुप्रदत्तः उपदेशः बुद्धिशुद्धौ महत्साहाय्यं करोति। कश्चन केवलं ध्याने उपविश्य समाधिं प्राप्तुं न शक्नोति न वा कदापि सफलो भवति यतो हि समाधौ अनेके बाधकाः भवन्ति। साधारणः जनः तेषां निराकरणं कर्तुम् असमर्थो भवति ततश्च काठिन्यम् अनुभूय तस्मात् मार्गात् निवर्तते। केवलं सद्गुरुप्रदत्तमार्गस्य अनुसरणेन एव साधकस्य पुरतः सः मार्गः प्रशस्तः भवति ततः च साधकः समाधिं प्राप्तुं शक्नोति।

राधापञ्चशतीकाव्ये यथा ध्यानस्य उपासनायाः च वर्णनं विद्यते भगवत्याः राधायाः कृपाकटाक्षस्य वर्णनमपि बहुधा लभ्यते। तत्र राधायाः कृपालवेन धनरहितः पुरुषः अपि धनवान् भवति, यः जनः अनश्वरः भवति, त्रिविधिदुःखात् निर्गत्य संसारबन्धनात् मुक्तिं प्राप्तुम् अर्हति। एवं भगवत्याः कृपायाः वर्णनं दृश्यते। पुनश्च अत्र उपासनायाः सूक्ष्मविधयः अपि वर्णिताः सन्ति। स्वरूपध्यानविषये पूर्वम् उक्तं तत्र स्वरूपध्यानप्रक्रियायां चरणारविन्दयोः अभूषणानां शृङ्गाराणां च रोचकं वर्णनं विद्यते। तत्र चरणारविन्दयोः ध्यानं चिन्तनं च उपासनामार्गे दास्यभावस्य प्रधानः बिन्दुः भवति। यदा उपासकस्य मनसि सेव्यसेवकभावरूपः सम्बन्धः परिपक्वः भवति तदा सः उपासकः अचिरादेव दास्यभावरसास्वादं करोति। सः तदा एतत् अनुभवति यत् भगवत्याः राधायाः चरणारविन्दौ एव भवजन्ममरणपीडाभ्यः मनुष्यान् रक्षयितुं समर्थौ आस्ताम्। दास्यभावावस्थायां यदा चरणारविन्दयोः एव चित्तवृतिः निमग्ना भवति तदा रसास्वादः जायते। अयमेव भक्तिरसः इत्युच्यते। उपासकः अस्यैव रसस्य अनुभूतिं करोति। अस्याम् अवस्थायाम् उपासकस्य स्थूलशरीरं राधायाः चरणयोः निहितम् भवति। एवं

च कृष्णराधयोः चरणारविन्दयोः सम्यक् ध्यानेन चिन्तनेन च साधकस्य अस्मिन् जन्मनि जन्मान्तरे वा कृतं पापं नष्टं भवति। एवं स्थितं त्रिगुणात्मेक अस्मिन् देहे सत्त्वगुणस्य अधिकता प्रधानता वा स्फुटं जायते। अस्माकं शीररे यत् गुणत्रयं वर्तते तेषु सत्त्वगुणस्य स्वभावः एव भवति लघुता किञ्च ऊर्ध्वगामित्वम्। अतः यदा शरीरे चित्ते च सत्त्वगुणस्य आधिक्यं भवति तदा मनुष्यः स्वतः शान्तिम् अनुभवति तस्य चित्ते भाराः न तिष्ठन्ति ज्ञानं चोत्पद्यते। देव्याः राधायाः चरणयोः ध्यानेन अविद्यायाः अस्मितायाः रागस्य द्वेषस्य च समूलं नाशः भवति। किञ्च मनुष्यः कामादिभ्यः पञ्चरिपुभ्यः अपि जयं प्राप्नोति। पुनश्च उपासकः यदा राधायाः ध्याने लीनो भूत्वा राधायाः कृते सुन्दराणि स्तबानि गायति तदा सः स्वतः एव अस्मात् संसारबन्धनात् मुक्तः भवति। पुनश्च यः विद्वान् तान् स्तबान् अन्येषां पुरतः सुमधुररीत्या गायति किञ्च अन्येषां कृते स्तबानाम् अर्थं बोधयति सः पुरुषः ते श्रोतारश्च निर्मलाः भवन्ति।

## परिशीलितग्रन्थसूची


केदारभट्टः। *वृत्तरत्नाकरः (चन्द्रिका—संस्कृतहिन्दीव्याख्योपेतः)*। आचार्यबलदेव उपाध्यायः (व्याख्याकारः)। वाराणसी : चौखम्बा सुरभारती प्रकाशन।

मम्मटः। *काव्यप्रकाशः (बालबोधिन्याख्यटीकया समन्वितः)*। भट्टवामनः (टीकाकारः संशोधकश्च)। मुम्बई : निर्णयसागरयन्त्रालयः। १९०१। द्वितीयं संस्करणम्।

विश्वनाथः, कविराजः। *साहित्यदर्पणः (विमलाख्यया हिन्दीव्याख्यया विभूषितः)*। श्रीकान्तशास्त्री (प्रकाशकः)। लखनऊ : नवलकिशोर प्रेस। १९३४। द्वितीयं संस्करणम्।

*प्रोफेसर रसिक विहारी जोशी कृत श्रीराधापञ्शती काव्यं का समीक्षात्मक अध्ययन*। राजेश सिंह (अनुसन्धाता)। इलाहावादविश्वविद्यालयः। २०००।

श्रीरूपगोस्वामी। *हरिभक्तिरसामृतसिन्धुः (श्रीजीवगोस्वामिपादकृतया दुर्गमसंगमन्याख्यटीकया सहितः)*। गोस्वामिदामोदरशास्त्री (सम्पादकः)। वाराणसी। १९८८।

*परमानन्दसागर (पदसंग्रह)*। डॉ गोवर्धननाथशुक्लः (सम्पादकः)। भारतप्रकाशनमन्दिर (प्रकाशकः)। अलिगढ। १९५८।

भरतमुनिः। *नाट्यशास्त्रम् (प्रारम्भिकध्यायद्वयमात्रम्)*। श्रीजगन्नाथशास्त्री तैलङ्ग (सम्पादकः)। दिल्ली : भारतीयविद्याप्रकाशन। २०००। प्रथमसंस्करणम्

वामनः। *काव्यालङ्कारसूत्राणि (स्वोपज्ञवृत्तिसहितानि कला-प्रतिकलासंस्कत-हिन्दीव्याख्योपेतानि)*। गुणविवेचन नाम तृतीयाधिकरणम्। लोकमणिदाहालः (व्याख्याकारः)। वाराणसी : चौखम्बा अमृतभारती प्रकाशन। ११३८।

रूपगोस्वामी। *उज्ज्वलनीलमणिः (लोचनरोचनीनाम्न्या आनन्दचन्द्रिकानाम्न्या टीकया च सहितः)*। नारायणगोस्वामी महाराजः (सम्पादकः)। श्रीभक्तिवेदान्ततीर्थमहाराजः (प्रकाशकः)। गौडीयवेदान्तप्रकाशनम्। २००६। प्रथमसंस्करणम्।